साधने कर्म्मादौ। "संस्थां विज्ञाय संन्यस्य कर्म्म त्रैव-र्गिकञ्च यत्" भा०ग० २।४।५। स्त्रियां ङीप्। "सिद्धि-स्त्रैवर्गिकी यतः" भाग० ३।१४।१५। त्रिवर्गे प्रसृतः ठञ्। २त्रिवर्गरते। "त्रैवर्गिकास्ते पुरुषा विमुखा हरि-मेधसः" भाग० ३।३२।१४।

**त्रैवर्ग्य** त्रि० त्रिवर्गे साधुः ष्यञ्। त्रिवर्गसाधने धनादौ "त्रैवर्ग्यार्थो यतो नित्यं कृतान्तभयसंयुतः" भाग० ४।२।१२२।

**त्रैवर्णिक** त्रि० त्रिषु वर्णेषु विहितः ठञ्। १ब्राह्मणा-दित्रयरूपद्विजातिधर्म्मे। स्वार्थे ठञ्। २द्विजातौ च "त्रैवर्णिकानामराजकेषु राष्ट्रेषु परराष्ट्रपरचक्रागमना-दिजनिते स्वोसङ्करादौ प्राप्ते" कुल्लू०। "त्रैवर्णिकाना-मधिकारः" कर्कः।

**त्रैवर्षिक** त्रि० त्रिवर्षे भविष्यति ठञ्। "वर्षस्याभविष्यति" पा०नोत्तरपदवृद्धिः। त्रिवर्षे भविष्यति वस्तुनि "त्रैवर्षिकं तापश्चितं तस्य सौम्य संवत्सरः" आश्व० श्रौ० १२।५। १२। अभविष्यति तु त्रैवार्षिक इत्येव।

**त्रैवार्षिक** त्रि० त्रिवर्षे भूतो भवति वा ठञ् अभविष्य-त्त्वात् उत्तरपदवृद्धिः। १त्रिवर्षभूते २तत्र भवति वा। "यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये" मनुः। "त्रैवार्षिकाधिकान्नोयः स तु सोमं पिबेत् द्विजः" याज्ञ०।

**त्रैविक्रम** त्रिविक्रमस्येदम् अण्। १त्रिविक्रमसम्बन्धिनि। "त्रैविक्रमं पादमिवेन्द्रशत्रुः" रघुः २त्रिविक्रमावतारे च। "वर्द्ध यस्य महाबाहो! पुरा त्रैविक्रमे यथा" हरिवं० ५६ अ०।

**त्रैविद्य** पु० तिस्रो विद्याः समाहृताः ऋग्यजुःसामरूपा-स्त्रिविद्यं तदधीते वेद वा अण्। १वेदत्रयाभिज्ञे। "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः। त्रयश्चाश्र-मिणः पूर्व्वे परिषत् स्याद्दशावरा" व्यव० त० नारदः। "चत्वारो वेदधर्मज्ञाः पर्षद् त्रैविद्यमेव वा" "राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु। त्रैविद्यं वृत्ति-मद्ब्रूयात् स्वधर्मः पाल्यतामिति" याज्ञ०। तिसृणां विद्यानां समाहारः त्रिविद्यं स्वार्थे अण्। २तिसृषु विद्यासु। "धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम्" भाग०६।२।२४। ताश्च तिस्रो नानारूपाः "ऋचो यजूंषि सामानि त्रैविद्यं तत्र तिष्ठति" सा०व्रह्म० "स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः" मनुः "कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनाम्। गावोऽस्माकं परा वृत्तिरेतत्-त्रैविद्यमुच्यते" हरिवं० ७२अ० "त्रयोऽग्नयस्त्रयो वेदा-स्त्रैविद्यं कौस्तुभो मणिः" हरिवं० १६८ अ० "त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम्" मार्कण्डेयपु०।

**त्रैवि(पि)ष्टप** पु० त्रिविष्टपे वसति अण्। देवे शब्दार्थचि०। "त्रैविष्टपानामपि दूरदर्शनम्" भाग० ११।७।

**त्रैविष्टपेय** पु० त्रिविष्टपे वसति बा० ढक्। देवे "गन्धर्व-सिद्धासुरयक्षचारणत्रैविष्टपेयादिषु नानुविन्दत" भाग० ८।८।१२।

**त्रैवृष्ण** पु० त्रिवृष्णस्यापत्यं बा० अण्। राजभेदे "त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर! त्र्यरुणश्चिकेत" ऋ०५। २७।१।

**त्रैवेदिक** त्रि० त्रिषु वेदेषु तदध्ययनार्थं विहितः ठक्। वेद-त्रयाध्ययनार्थे व्रतादौ। "षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्" मनुः। [शब्दे दृश्यम्।

**त्रैशङ्कव** पु० त्रिशङ्कोरपत्यम् अण्। हरिश्चन्द्रे त्रिशङ्कु-

**त्रैशोक** न० त्रिशोकेन ऋषिणा दृष्टं साम। "विश्वा पृतना," इत्यादिकायामृचि गेये ब्रह्मस्तोत्रके सामभेदे।

**त्रैसानु** पु० तुर्वसुवंश्ये गोभानुसुते नृपभेदे "गोभानोस्तु सुतो राजा त्रैसानुरपराजितः। करन्धमस्तु त्रैशानो-र्मरुत्तस्तस्य चात्मजः" हरिवं०३२ अ०।

**त्रैस्वर्य्य** न० त्रिस्वर+चतुर्व० स्वार्थे ष्यञ्। उदात्तानुदात्त-स्वरितरूपस्वरत्रिके। तत्र यत्र यः स्वरः तत् उदात्ता-नुदात्तशब्दयोरुक्तं स्वरितशब्दे वक्ष्यते च तस्याप-वादः एकश्रुतिशब्दे १४८४पृ० उक्तः।

**त्रैहायण** त्रि०त्रिहायणस्येदम् हायनान्तत्वात् अण्। १त्रि-वर्षसम्बन्धिनि। स्त्रियां ङीप्। भावे अण्। २तद्भावे न०।

**त्रोटक** त्रि० त्रोडयति चु० त्रुट-ण्वुल्। १छेदके। "सप्ता-ष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्। त्रोटकं नाम तत् प्राहुः प्रत्यङ्कं सविदूषकम्" सा० द० उक्ते २दृश्यकाव्यभेदे प्रत्यङ्कं सविदूषकत्वात् शृङ्गारोऽत्राङ्गीति बोध्यम्। तत्र सप्ताङ्कं स्तम्भितरम्भम्। पञ्चाङ्कं विक्रमोर्वशी।

**त्रोटि(टी)** स्त्री चु० त्रुट-इ वा ङीप्। १कट्फले, २चञ्च्वाम्, (पक्षिर ठोठ) ३पक्षिभेदे ४मत्स्यभेदे च मेदिनि०। [खगे शब्दच०। स्त्रियां जातित्वात् ङीष्।

**त्रोटिहस्त** पुंस्त्री त्रोटिर्हस्त इव ग्रहणसाधनं यस्य।

**त्रोतल** न० १त्रोडलतन्त्रे (तोतला) २स्खलद्वाक्ये त्रि०।

**त्रोत्र** न० त्रायतेऽनेन त्रै-त्रन्। प्राजने तोदने गवादेः